वायोर्नवैकादश तेजसोगुणा जलक्षितिघ्राणमनांसहैव ॥ दिक्कालयोः पंचषडेव चांबरेशेश्वरेष्टौमनसस्तथैव ॥

DR BHAU DAJI

॥श्रीगणेशायनमः॥ ॥प्रणम्येदंत्रमीश्वरं मुनिकणादमन्वतः॥पदार्थधर्मसंग्रहः प्रवक्ष्येतमहोदयः॥१॥द्रव्यगुणकर्मसा
मान्यविशेषसमवायानांसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञाननिःश्रेयसहेतुःतच्चेश्वरोदनोभिव्यक्ताद्धर्मादेवाथकेद्रव्यादयःप
दार्थाःकिंचतेषांसाधर्म्यवैधर्म्यचेतितत्रद्रव्याणिपृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिसामान्यविशेषसंज्ञोक्तानि
नवैव।तद्व्यतिरेकेणतदभिधानात्।गुणास्तुरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नाश्चकर्मोक्ताःसप्तदशसप्तवशद्वसमुच्चिताश्चगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाइतिद्वित्ये
वंचतुर्विंशतिगुणाः।कर्माण्युत्क्षेपणमवक्षेपणमाकुंचनप्रसारणगमनानिपंचैवागमनयद्गमनभ्रमणरेचनस्यंदनोर्द्ध्व
ज्वलनतिर्यक्पवनमनाद्यागमनविशेषाएवनत्वजात्यंतराणि।सामान्यंद्विविधंपरमपरंचेति।तच्चानुवृत्तिप्रत्ययकार
णंतत्परंसन्नामद्दाविषयत्वात्।तच्चानुवृत्तेरवहेतुत्वात्सामान्यमेव।द्रव्यत्वाद्यपरमल्पविषयत्वात्।तच्चव्यावृत्तेरपिहे
तुत्वान्नसामान्यंसद्विशेषाख्यामपिलभते।नित्यद्रव्यवृत्तयोन्त्याविशेषाःतेखल्वत्यंतव्यावृत्तिबुद्धिहेतुत्वाद्विशेषाएव।अ
युतसिद्धानामाधार्याधारभूतानांयइहप्रत्ययहेतुःससमवायः।एवंधर्मैर्विनाधर्मिणामुद्देशःकृतः।षण्णामपिपदार्थानांसा
धर्म्यमस्तित्वाभिधेयत्वज्ञेयत्वानि।आश्रितत्वंचान्यत्रनित्यद्रव्येभ्यःद्रव्यादीनांपंचानामपिसमवायित्वमनेकत्वंचेति।गुणादी

नांपंचानांनिर्गुणत्वंनिःक्रियत्वंद्रव्यादीनांत्रयाणामपिसत्तासंबंधःसामान्यविशेषवत्त्वंस्वसमयार्थशब्दाभिधेयत्वंध
र्माधर्मकर्तृत्वंचकार्यत्वान्नित्यत्वेकारणवत्तामेवकारणत्वंचान्यत्रपरिमाण्वादिभ्यःद्रव्याश्रितत्वंचान्यत्रनित्यद्रव्ये
भ्यःसामान्यादीनांत्रयाणामपिस्वात्मसत्वबुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्त्वंनित्यत्वमर्थशब्दान
भिधेयत्वंचेति।पृथिव्यादीनांनवानामपिद्रव्यत्वयोगःस्वात्मन्यारंभकत्वंगुणवत्त्वंकार्यकारणविरोधित्वमंत्यविशेषवत्त्व
मनाश्रितत्वंनित्यत्वंचान्यत्रावयविद्रव्येभ्यःपृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वंक्षितिजलज्योति
रनिलमनसांक्रियावत्त्वंमूर्तत्वंपरत्वापरत्ववेगवत्त्वानिआकाशकालदिगात्मनांसर्वगतंपरममहत्त्वंसर्वसंयोगिसमा
नेदेशत्वंचपृथिव्यादीनांपंचानामपिभूतत्वंक्रियप्रकृतित्वंबाह्येकेंद्रियग्राह्यविशेषगुणवत्त्वानिचतुर्णांद्रव्याणामकत्व
स्पर्शवत्त्वोष्णाणांप्रत्यक्षत्वरूपवत्त्वद्रवत्वानिक्ष्मायुरुत्वंतत्कार्यपतनेरसवत्त्वंभूतात्मनांवैशेषिकगुणवत्त्वंक्षिति
दकात्मनांचतुर्दशगुणवत्त्वंआकाशात्मनांत्रयाणांकैकदेशवृत्तिविशेषगुणवत्त्वंदिक्कालयोःपंचगुणवत्त्वंसर्वोत्पत्तिम
त्तानिमित्तकारणत्वंचक्षितितेजसोर्नैमित्तिकद्रवत्वयोगःएवंसर्वत्रविपर्ययात्साधर्म्यवैधर्म्ये व्याख्यातेति।इदानी
मेकैकशोवैधर्म्यमुच्यते।पृथिवीत्वंतुसंबंधात्पृथिवीरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागप

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥श्रीगणेशायनमः॥ ॥प्रणम्येहेश्वरमीश्वरंमुनिंकणादमन्वतः॥पदार्थधर्मसंग्रहःप्रवक्ष्येतमहोदयः॥१॥द्रव्यगुणकर्मसा
मान्यविशेषसमवायानांसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानंनिःश्रेयसहेतुः॥तत्रेश्वरोदनाभिव्यक्तादृष्टादेवा॥अथकेद्रव्यादयःप
दार्थाःकिंचतेषांसाधर्म्यंवैधर्म्यंचेति॥तत्रद्रव्याणिपृथिव्यप्तेजोवायुराकाशकालदिगात्ममनांसिसामान्यविशेषसंज्ञाकानि
नवैव॥तद्व्यतिरेकेणतदभिधानात्॥गुणाःरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नाश्चकंगेक्ताःसप्तदशसप्तवशद्दसमुच्चिताश्च॥गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाइतिद्रव्ये
ष्वेवचतुर्विंशतिगुणाः॥कर्माण्युत्क्षेपणंअपक्षेपणंआकुंचनंप्रसारणंगमनानिपंचैवागमनग्रहणेनभ्रमणंरेचनस्यंदनोर्द्ध्व
ज्वलनंतिर्यक्प्रवहणंवायुनाभ्रमनादियोगमनविशेषाएवनचजात्यंतराणि॥सामान्यंद्विविधंपरमपरंचेति॥तच्चानुवृत्तिप्रत्ययकार
णंतच्चपरंसत्तामहाविषयत्वात्॥तच्चानुवृत्तेरेवहेतुत्वात्सामान्यमेव॥द्रव्यत्वाद्यपरमल्पविषयत्वात्॥तच्चव्यावृत्तेरपिरु
पत्वात्सामान्यंसद्विशेषाख्यामपिलभते॥नित्यद्रव्यवृत्तयोह्यविशेषाःतेचखल्वत्यंतव्यावृत्तिबुद्धिहेतुत्वाद्विशेषाएव॥अ
युतसिद्धानामाधार्याधारभूतानांयइहप्रत्ययहेतुःससमवायः॥एवंधर्मैर्विनाधर्मिणमुद्दिशःकृतः॥षण्णामपिपदार्थानांसा
धर्म्यमस्तित्वाभिधेयत्वज्ञेयत्वानि॥आश्रितत्वंचान्यत्रनित्यद्रव्येभ्यः॥द्रव्यादीनांपंचानामपिसमवायित्वमनेकत्वंचेति॥गुणादी

नांपंचानांनिर्गुणत्वंनिःक्रियत्वं॥द्रव्यादीनांत्रयाणामपिसत्तासंबंधःसामान्यविशेषवत्त्वं॥स्वसमवायार्थशब्दाभिधेयत्वंध
र्माधर्मकर्तृत्वंचकार्यत्वंनित्यत्वेकारणवत्तामेव॥कारणत्वंचान्यत्रपारिमाण्डल्याद्भ्यः॥द्रव्याश्रितत्वंचान्यत्रनित्यद्रव्य
भ्यः॥सामान्यादीनांत्रयाणामपिस्वात्मसत्वबुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्त्वंनित्यत्वमर्थशब्दान
भिधेयत्वंचेति॥पृथिव्यादीनांचतुर्णामपिद्रव्यत्वयोगः॥स्वात्मन्यारंभकत्वंगुणवत्त्वंकार्यकारणविरोधित्वमंत्यविशेषवत्त्व
मनाश्रितत्वंनित्यत्वेचान्यत्रावृत्तयविद्रव्येभ्यः॥पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्वं॥क्षितिजलज्योति
रनिलमनसांक्रियावत्त्वंमूर्त्तत्वंपरत्वापरत्ववेगवत्त्वानि॥आकाशकालदिगात्मनांसर्वगतंपरममहत्त्वंसर्वसंयोगिसमा
नेदेशत्वंच॥पृथिव्यादीनांपंचानामपिभूतत्वंक्रियप्रकृतित्वंबाह्येकेंद्रियग्राह्यविशेषगुणवत्त्वानि॥चतुर्णांद्रव्याणामनेकत्व
स्पर्शवत्त्वेत्रयाणांप्रत्यक्षत्वरूपवत्त्वद्रवत्वानि॥द्रव्यार्गुरुत्वंतत्कार्यपतनेरसवत्त्वं॥भूतात्मनांवैशेषिकगुणवत्त्वं॥क्षिति
दकात्मनांचतुर्दशगुणवत्त्वं॥आकाशात्मनांत्रयाणांकेकदेशवृत्तिविशेषगुणवत्त्वं॥दिक्कालयोःपंचगुणवत्त्वं॥सर्वोत्पत्ति
नांनिमित्तकारणत्वंच॥क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः॥एवंसर्वत्रविपर्ययात्साधर्म्यवैधर्म्येचेतिवाच्यमितिइदानी
मेकैकशोवैधर्म्यमुच्यते॥पृथिवीत्वाभिसंबंधात्पृथिवी॥रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागप

रत्वापरत्वगुरुत्वद्रवत्व[illegible]रवती।एते गुणविनिवेशाधिकारे स्वादयः विशेषगुणाः सिद्धाः।वाक्शुषवचनात्सज्ञासंख्या दयः।पतनोपदेशाद्गुरुत्वं।अद्भिः सामान्यवचनाद्द्रवत्वं।उत्तरकर्मवचनात्संस्कारश्च।क्षितावेवगंधः रूपमनेकप्रकारंशुक्लादिः।रसः षड्विधोमधुरादिः।गंधोद्विविधः।सुरभिरसुरभिश्च।स्पर्शोस्यात्।अनुष्णाशीतत्वेसतिपाकजः।सच द्विविधोनित्योऽनित्यश्चेति।परमाणुलक्षणोनित्यः।कार्यलक्षणोत्वनित्यः।सावस्थैर्यावयवसंनिवेशविशिष्टः।अपरजातिवद्गुणोपेता।शयनासनाद्यनेकोपकारकरीच।त्रिविधंचास्याः कार्यशरीरेंद्रियविषयसंज्ञकं।द्विविधंशरीरं।योनिजमयोनिजं चेति।तत्रायोनिजमनपेक्ष्यशुक्रशोणितं।देवर्षीणांशरीराणि।धर्मविशेषसहितेभ्योऽणुभ्योजायंते। दुःखबहुलायातनाशरीराणि।अधर्मविशेषेभ्योऽणुभ्योजायंते।शुक्रशोणितसंनिपातजंयोनिजं।तत्तुद्विविधंजरायुजमंडजंच।मानुषपशुमृगाणांजरायुजं।पक्षिसरीसर्पाणामंडजं।इंद्रियंगंधव्यंजकंघ्राणं।सर्वप्राणिनांजलाद्यनभिभूतैःपार्थिवावयवैरारब्धम्।विषयस्तुद्व्यणुकादिप्रक्रमेणारब्धस्त्रिविधोमृत्पाषाणस्थावरलक्षणः।तत्र मृत्स्नदेशाःप्राकारेष्टकादयोविकाराः।पाषाणउपलमणिवज्रादयः।स्थावरास्तृणौषधिवृक्षगुल्मलतावनस्पतयः।अद्भ्योभिसंबंधाद्वापः।रूपरसस्पर्शद्रवत्वस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व

राम
२

संस्कारवत्यः।एतेचपूर्ववत्सिद्धाः।शुक्लमधुरशीतास्निग्धरूपरसस्पर्शाः।स्नेहोऽप्स्वप्रसांसिद्धिकंचद्रवत्वं।तासुक्वचिद्द्विविधानित्यानित्यभावात्।कार्यंत्रिविधं।शरीरेंद्रियविषयसंज्ञकं।तत्रशरीरमयोनिजमेववरुणलोके।पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं।इंद्रियंसर्वप्राणिनांरसव्यंजकं।विजातीयानभिभूतैर्जलावयवैरारब्धंरसनं।विषयस्तुसरित्समुद्रहिमकरकादिरिति।तेजस्त्वाभिसंबंधात्तेजः।रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्।पूर्ववदेषांसिद्धिः।शुक्लंनास्वंस्वरूपं।उष्णएवस्पर्शोनित्यैर्मिश्रितंद्रवत्वं।तदपिद्विविधं।अणुकार्यभावात्। कार्यशरीरादित्रयं।शरीरमयोनिजमेवादित्यलोके।पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं।इंद्रियंसर्वप्राणिनांरूपव्यंजकं।अन्यावयवानभिभूतैस्तेजोवयवैरारब्धंचक्षुः।विषयसंज्ञकंचत्रिविधं।भौमंदिव्यमुदर्यमाकरजंच।अत्रभौमंकाष्ठेंधनं।ऊर्ष्मोर्जनस्वभावंपचनस्वेदनादिसमर्थं।दिव्यमग्निंधनंसौरविद्युदादि।शुक्लस्याहारस्परसादिपरिणामसमर्थमुदर्यं।आकरजंचसुवर्णादि।तत्रसंयुक्तसमवायाद्रूपोपलब्धिरिति।वायुत्वाभिसंबंधाद्वायुः।स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान्।स्पर्शोऽस्यानुष्णाशीतत्वेसतिपाकजः।गुणविनि

वज्ञाधिकोरसिद्धः।अरूपिष्ववायुपवनात्संस्कारः।सचायंद्विविधः।अणुकार्य
भावात्।तत्रकार्यलक्षणश्चतुर्विधः।शरीरमिंद्रियंविषयःप्राणश्चेति।तत्रायोनित्यमेवशरीरंमरुतांलोकेपार्थि
वावयवोपष्टंभाच्चोपभोगसमर्थंइंद्रियंसर्वप्राणिनांस्पर्शोपलंभकंपृथिव्याद्यनभिभूतेःवाय्ववयवैरारब्धं
सर्वशरीरव्यापित्वंगिंद्रियं।विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः।स्पर्शाच्चाद्दष्टधृतिकंपलिंगः।तिर्यग्गमनस्व
भावकोमेघादिप्रेरणादिसमर्थः।तस्याप्रत्यक्षस्यापिनानात्वंसंमूर्छनेनानुमीयते।संमूर्छनंपुनःसमानजव
योर्विरुद्धदिक्क्रिययोर्वायोःसन्निपातः।सोपिपृथिव्यादिगमनेनानुमितेनसावयविनोरूर्ध्वगमनेनानुमीयते।
प्राणोंतःशरीररसमलधातूनांप्रेरणेहेतुरेकःसन्क्रियाभेदादपानादिसंज्ञांलभते।इदानींवह्न्यर्थमपिमहा
भूतानांसृष्टिसंहारविधिरुच्यते।ब्रह्मणोमानेनवर्षशतातेवर्त्तमानस्यब्रह्मणोपवर्गकालेसंसारखिन्नानांस
र्वप्राणिनांनिशिविश्रामार्थंसकलभुवनपतेर्महेश्वरस्यसंजिहीर्षासमकालंशरीरेंद्रियमहाभूतोपनिबंधका
नांसर्वात्मगतादृष्टानांवृत्तिविरोधसतिमहेश्वरेच्छासहितात्माणुसंयोगजकर्मभ्यःशरीरेंद्रियकारणाणुवि

रम
३

भागेभ्यःतत्संयोगनिवृत्तौतेषामापरमाण्वंतोविनाशः।तथापृथिव्युदकज्वलनपवनानामपिमहाभूतानामनेनैव
क्रमेणोत्तरस्मिन्नुत्तरस्मिन्नसति [illegible]पूर्वस्यपूर्वस्यविनाशःततःप्रविभक्ताःपरमाणवोऽवतिष्ठंते।धर्माधर्मसंऽ
स्कारानुविद्धाआत्मानस्तावंतमेवकालंततःपुनःप्राणिनांभोगभृतयेमहेश्वरस्यसिसृक्षानंतरंसर्वात्मगतदृ
ष्टिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यःपवनपरमाणुष्वकर्मोत्पन्नोतेषांपरस्परसंयोगेभ्योद्व्यणुकादिक्रमेणम
हान्वायुःसमुत्पद्यानभसिदोधूयमानस्तिष्ठति।तदनंतरंतस्मिन्नेवाप्येभ्यःपरमाणुभ्यस्तेनैवप्रकारेणमहान्सलि
लनिधिरुत्पन्नःपोह्यमानस्तिष्ठति।तदनंतरंतस्मिन्नेवपार्थिवेभ्यःपरमाणुभ्योद्व्यणुकादिक्रमेणमहाद्यु
थिवीसमुत्पन्नासंहतावतिष्ठते।तदनंतरंतस्मिन्नेवमहोदधौतेजसेभ्यःपरमाणुभ्योद्व्यणुकादिक्रमेणोत्पन्नो
महांस्तेजोराशिर्दीप्यमानस्तिष्ठति।एवमुत्पन्नेषुचतुर्षुमहाभूतेषुमरुन्महेश्वरस्याभिध्यानमात्रात्तेजसे
भ्योऽणुभ्यःपार्थिवपरमाणुसहितेभ्योमहदंडमुत्पद्यते।तस्मिंश्चतुर्वदनकमलंसर्वलोकपितामहंब्रह्माणं
सकलभुवनसहितमुत्पाद्यप्रजासर्गेनियुंक्ते।सचमहेश्वरेणनियुक्तोब्रह्मातिशयितज्ञानवैराग्यैश्वर्यसंप

न्नः सर्वप्राणिनांकर्मविपाकविदित्याकर्मादिरूपज्ञानभोगायुषःसुतान्प्रजापतीन्मानसान्मनुदेवर्षिपितृ
गणान्मुखबाहूरुपादतश्चतुरोवर्णान्यानिचेज्जादचानिसृष्ट्वाआशयानुरूपेर्द्धर्मज्ञानवैराग्येपश्चर्यैःसं
योजयतीति।आकाशकालदिगात्मकैकत्वादपरजात्यभावेसतिपारिभाषिकस्तिस्त्रःसंज्ञानवंति।आका
शंकालोदिगिति।तत्राकाशगुणाःशब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।शब्दःप्रत्यक्षत्वेसत्यका
रणगुणपूर्वकत्वादद्यावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्चनस्पर्शवद्विशेषगुणः।बाह्येंद्रियप्रत्यक्ष
त्वादात्मांतरस्याध्यत्वादात्मन्यसमवायादहंकारेणविभक्तग्रहणाच्चनात्मगुणः।श्रोत्रग्राह्यत्वाद्विशेषिक
गुणाभावाच्चनदिक्कालमनसां।पारिशेष्याद्गुणोभूत्वाआकाशस्याधिगमेलिंगं।शब्दलिंगाविशेषादेक
त्वसिद्धं।तदनुविधानात्पृथक्त्वं।विभुवचनात्परममहत्परिमाणं।शब्दकारणत्वंनात्संयोगविभागौ।अ
तोगुणवत्त्वादनाश्रितत्वाच्चद्रव्यं।समानासमानजातीयकारणसंभवाच्चनित्यसर्वप्राणिनांशब्दोपल
ब्धेर्निमित्तंश्रोत्रमावेना।श्रोत्रंत्वनःश्रवणविवरसंज्ञकोनभोदेशः।शब्दनिमित्तोपभोगप्रापकधर्मोध

राम
४

र्मोपनिबद्धः।तस्यचनित्यत्वेसत्यप्युपनिबंधकवैकल्याद्वाधिर्य्यमिति।कालःपरापरव्यतिकरयौगपद्या
द्यविरुद्धप्रत्ययलिंगः।तेषांविषयेषुपूर्वप्रत्ययविलक्षणानामुत्पत्तावसंभवाद्यदत्रनिमित्तंसकालः।सर्वकार्या
णामुत्पत्तिस्थितिविनाशहेतुस्तद्यपदेशभाक्त्वनिमेषकाष्ठाकलामुहूर्त्तयामाहोरात्रार्द्धमासर्त्वयनसंव
त्सरयुगकल्पमन्वंतरप्रलयमहाप्रलयव्यवहारहेतुश्च।तस्यगुणाःसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।
काललिंगाविशेषादेकत्वंसिद्धं।तदनुविधानात्पृथक्त्वं।कारणेकालश्रुतिवचनात्परममहत्परिमाणं।कारणप
रत्वादितिवचनान्नित्ययोगः।तद्विनाशाकत्वाद्विभुरितिं।तस्याकाशवद्द्रव्यत्वनित्यत्वेसिद्धे।काललिंगाविशेषा
दंशसैकत्वेसिद्धेपि सर्वकार्याणांप्रारंभक्रियाभिनिवृत्तिस्थितिनिरोधापाधिभेदान्मणिवत्प्राचकंद्वानाना
त्वोपचारइति।इ।।दिक्पूर्वापरादिप्रत्ययलिंगामूर्त्तद्रव्यमवधिंकृत्वामूर्त्तेषेवद्रव्येभूएतस्मादिदंपूर्वेणदं
क्षिणेनपश्चिमेनोत्तरेणपूर्वेदक्षिणेनदक्षिणापरेणापरोत्तरेण।उत्तरपूर्वेणाधस्तादुपरिष्टाच्चेतिदशप्रत्य
यायतोनवंतिमादिकाअन्यनिमित्तासंभवात्तस्याःकगुणाःसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।काल

व४

वदेतेभिद्धाः।दिङ्नियमविशेषादेकत्वसिद्धेपि दिशःपरमर्षिभिः श्रुतिस्मृतिविलोकव्यवहारार्थंमेरुंप्रदक्षिणमानस्यभगवतःसवितुर्म्मेसंयोगविशेषास्तेषां लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाःप्राच्यादिभेदेनदशविधाःसंज्ञाःकृतास्ततोनक्त्वादशदिशःसिद्धाः।तासामेवदेवतापरिग्रहवशात्पुनर्दशसंज्ञाभवंति।माहेंद्रीवैश्वानरीयाम्यानैर्ऋतीवारुणीवायव्याकौबेरीऐशानीब्राह्मीनागीचेति।६३॥आत्मत्वाभिसंबंधादात्मा।तस्यसोहम्मादप्रत्यक्षत्वेपिकरणैःज्ञाद्यनुमितेःश्रोत्रादिभिःसमधिगमःक्रियते।वाक्शब्दादीनामिवकरणानांप्रयोज्यत्वदर्शनात्।ज्ञात्रादिपुत्रसिद्धावप्रसाधकोऽनुमीयते।नशरीरेंद्रियमनसामज्ञातत्वात्।नशरीरस्यचैतन्यंघटादिवद्भूतकार्यत्वात्।मृतेवासंभवात्तेन्द्रियाणांकरणभावात्।उपलब्धेषुविषयसान्निध्येवानुस्मृतिदर्शनात्।नापिमनसःकर्तृकरणनपेक्षत्वेयुगपदालोचनस्मृतिप्रसंगात्।स्वयंकरणभावाच्च।अतःपारिशेष्यादात्मकार्यत्वादात्मासमधिगम्यते।शरीरसमवायिनीभ्यांहिताहितप्राप्तिपरीहारयोग्याभ्यांप्रवृत्तिनिवृत्तिभ्यांरथकर्मणासारथिवत्प्रयत्नवान्क्रियाहेत्वाधिष्ठातानुमीयते।प्राणादिभि

श्चैकथं।शरीरपरिगृहीतेवायोर्विकृतकर्म्मदर्शनात्।भस्त्राधमापयितेवनिमेषोन्मेषकर्मणानुमीयतेनियतेनचदारुयंत्रप्रयोक्तृवत्।देहस्यवृद्धिमत्प्रत्तसंरोहणादिनिमित्तत्वात्।गृहपतिरिवाभिमतविषयग्राहककरणसंबंधनिमित्तेनमनःकर्मणागृहकोणव्यवस्थितपेलकप्रेरकइवदारकः।नयनविषयालोचनानंतरंरसानुस्मृतिक्रमेणरसनाविक्रियादर्शनादेनकगवाक्षांतर्गतप्रेक्षकवदन्यदशैकस्मिन्द्विज्ञायते।सुखदुःखेच्छाद्वेषप्रयत्नेष्वगुणेगुणेपनुमीयते।तेचनशरीरेंद्रियगुणाः।कस्मादहंकारेणैकवाक्यभावात्।प्रदेशवृत्तित्वादवद्रव्यभावित्वाद्बाह्येंद्रियाप्रत्यक्षत्वाच्च।तथारूपादिनपृथिव्यादिशद्रव्यव्यतिरेकादिति।तस्यगुणाःबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।आत्मलिंगाधिकारेबुध्यादयःप्रयत्नांताःसिद्धाः।धर्म्माधर्म्मावात्मांतरगुणानामकारणवचनात्।संस्कारस्मृत्युत्पत्तौ। व्यवस्थावचनात्संख्यापृथक्त्वमप्यतएवातथावात्मेति वचनात्परममहत्परिमाणं। सन्निकर्षजत्वात्सुखादीनांसंयोगः।तद्विनाशकत्वाद्विभागइति।६३॥मनस्त्वाभिसंबंधान्मनः।सत्यप्यात्मेंद्रियार्थसन्निधेज्ञानसुखादीनामयुगपदुत्पत्तिद

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ज्ञानाकारणं॥ मनुमीयते॥ ज्ञानाद्व्यापारेऽकृत्यतिदज्ञाना॥ बाह्येंद्रियैरगृहीतसुखादिग्राह्यांतरमावा
दितास्यगुणा॥ संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराःप्रयत्नज्ञानायोगपद्यवचना
त्क्रियाशरीरेन्द्रियार्थयत्क्रमव्यतएवतद्भावेवत्वमादृष्टपरिमाणोपसर्पणोपसर्पणवचनात्संयोगवि
भागेष्वेवान्यत्वापरत्वेसंस्कारश्च॥ अस्पर्शवत्त्वाद्व्यापारेऽनेककर्तृक्रियावत्त्वान्मूर्त्तसाधारणविग्रहवत्त्व
संयोगादज्ञानकरणत्वाच्चान्यत्रार्थेगुणवत्त्वाद्द्रव्यंप्रयत्नादृष्टपरिग्रहादाशुसंचारिचेति॥ ॥इतिद्रव्यपदा
र्थः॥ ॥छ॥ ॥ ॥श्री॥ ॥श्रीगुरुचरणारविंदेभ्योनमः॥ ॥छः॥ ॥छ॥ ॥श्री॥ श्री॥ ॥ ॥

राम
६